COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

# अनुप्रासालंकारः

स्वरवर्णस्य वैसादृश्ये अपि व्यञ्जनस्य सदृशत्वे अनुप्रासः अलंकारो भवति।अनुप्रासशब्दस्य व्याख्या प्रसङ्गे उक्तम्- "रसाद्यनुगतः(प्रकृतरसव्यञ्जकः)प्रकृष्टो न्यासः(आवृत्तिः)अनुप्रासः।उक्तं च मम्मटेन- "वर्णसाम्यमनुप्रासः"।अयं अनुप्रासालंकारो द्विविधः-छेकानुप्रासः वृत्यनुप्रासश्च।उक्तं च काव्यप्रकाशस्य नवमाध्याये-"छेकवृत्तिगतो द्विधा"।

**छेकानुप्रासः**-व्यञ्जनसमुदायस्य स्वरूपतः क्रमतश्च एकवारं साम्यं छेकानुप्रासः।छेकानुप्रासस्य संज्ञाप्रसङ्गे मम्मटेन उक्तम्-"सोऽनेकस्य सकृत्पूर्वः"।अस्य छेकानुप्रासस्य उदाहरणं यथा -

"ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी।
दध्ने कामपरिक्षामकामिनीगण्डपाण्डुताम्"।।

अस्मिन् उदाहरणे 'स्पन्दमन्दी' इत्यत्र नकार-दकारयोः, 'गण्डपाण्डु' इत्यत्र णकार-डकारयोः 'काम-कामिनी' इत्यत्र ककार-मकारयोः च तथा अनेकस्य व्यञ्जनवर्णस्य सकृत् साम्यम् अस्ति।अतः अत्र छेकानुप्रासः अलंकारो भवति।

**वृत्यनुप्रासः**-मम्मटेन वृत्यनुप्रासस्य संज्ञाप्रसङ्गे कथितम्- "एकस्याप्यसकृत्परः"।अर्थात् एकस्य अनेकस्य वा व्यञ्जनवर्णस्य अनेकवारं साम्यमेव वृत्यनुप्रासः।मम्मटस्य मते वृत्तिः त्रिविधा।यथा-उपनागरिका,परुषा कोमला

COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

च।उपनागरिकायाः वृत्त्याः संज्ञा भवति-"माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते"।परुषा भवति-"ओजः प्रकाशकैस्तैस्तु परुषा।अवशिष्टस्थाने कोमला वृत्तिः भवति।मम्मटेन तस्मात् कोमलायाः वृत्त्याः संज्ञा उक्ता-"कोमला परैः"।कोमलामेव केचित् ग्राम्येति वदन्ति।वामनेन वृत्तिं रीतिः इति नाम्ना अभिहिता।तस्य मते रीतिः त्रिविधा।यथा- वैदर्भी, गौढ़ी पाञ्चाली च।कोमला इति वृत्त्याः उदाहरणम्-

"अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।

अलमलमालि मृणालैरिति वदति दिवानिशं वाला"।।

अस्मिन् उदाहरणे रेफस्य लकारस्य वहुवारं सादृश्यम् अस्ति।अतः अत्र वृत्त्यनुप्रासः अलंकारो भवति।

**लाटानुप्रासः**-मम्मटेन प्रथमं तावत् वर्णानुप्रासं निरुप्य शब्दानुप्रासः निरुप्यते।तस्य मते शब्दानुप्रासो भवति लाटानुप्रासः।अस्य लाटानुप्रासस्य संज्ञा- "शब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः"।अर्थात् तात्पर्यमात्रस्य भेदे तुल्यार्थकशब्दसादृश्ये तु लाटानुप्रासो भवति।स च लाटजनवल्लभत्वात् लाटानुप्रास इत्युच्यते।अनेके लाटानुप्रासं पदानुप्रासः इति नाम्ना अभिधीयन्ते।अस्मिन् लाटानुप्रासे एकाधिकपदानां एकपदस्य वा पुनरावृत्तिः भवति।प्रथमं तावत् 'पदानां सः'-

"यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।

यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य"।।

**COMPILED & CIRCULATED BY**
TUMPA JANA(ASSISTANT PROFESSOR)
**DEPT. OF SANSKRIT**
**NARAJOLE RAJ COLLEGE**

अत्र सविधे-दयितेत्यादीनां वहूनां तात्पर्यमात्रभेदेन आवृत्तिरिति अनेकपदगतो लाटानुप्रासः।उद्देश्यविधेयभावभेदाच्च तात्पर्यभेदः।द्वितीयस्तु 'पदस्यापि' अर्थात् एकपदगत इत्यर्थः।यथा-

"वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः।

सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत्"।।

अत्र 'सुधाकरः' इत्यस्य एकस्य पदस्य तात्पर्यभेदेन आवृत्तिरिति एकपदगतो लाटानुप्रासः।उद्देश्यविधेयभावभेदाच्च तात्पर्यभेदः।

अनेके आलंकारिकाः लाटानुप्रासं स्वीकृतवन्तः।ते वृत्त्यनुप्रासस्य नानाविधं लक्षणमपि ददन्ति।परन्तु अत्र मम्मटेन वृत्तिशब्दस्य अर्थः समासेन गृह्यते।अर्थात् मम्मटस्य मते वृत्तिः भवति समासः।अतः एकस्मिन् समासे भिन्ने समासे वा समासासमासयोः मध्ये प्रातिपदिके च शब्दानां पुनरावृत्तिः भवति वृत्त्यनुप्रासः।मम्मटस्य मते अयं वृत्त्यनुप्रासो भवति लाटानुप्रासः।तस्मात् तेन उक्तम्-"वृत्त्यावन्यत्र तत्र वा।नाम्नः स वृत्त्यावृत्त्योश्च"।।'एकस्मिन् समासे,भिन्ने वा समासे, समासासमासयोर्वा,नाम्नः प्रातिपदिकस्य,न तु पदस्य सारुप्यम्"।उदाहरणम्-

"सितकरकररुचिरविभा विभाकराकार धरणिधर कीर्तिः।

पौरुषकमला कमला सापि तवैवास्ति नान्यस्य"।।

अत्र 'कर-कर' इत्येकसमासः ,'विभा-विभा' इति भिन्नौ समासौ,'कमला-कमला' इति पूर्वस्य समासः,उत्तरस्य असमासः इति त्रयाणामपि एकमेव उदाहरणमिदम्।

**COMPILED & CIRCULATED BY**
TUMPA JANA(ASSISTANT PROFESSOR)
**DEPT. OF SANSKRIT**
**NARAJOLE RAJ COLLEGE**

अतः छेकानुप्रासम् ,वृत्यनुप्रासम् एवञ्च लाटानुप्रासस्य भेदत्रयं गृहीत्वा अनुप्रासः अलंकारः पञ्चविधो भवति।तस्मात् मम्मटेन उक्तम्-"तेनायं पञ्चधा मतः"।।

Ref.-

(1)কাব্যপ্রকাশ(নবম ও দশম উল্লাস)।

(2)काव्यप्रकाशरहस्यम्